# दिल्ली पब्लिक स्कूल, राँची

## सेल टाउनशिप, राँची

### अर्द्धवार्षिक परीक्षा (2017-18)

कक्षा– दस | विषय–संस्कृत
समय–3 घंटे | पूर्णांक– 80

---

खण्ड क– 10 अंकाः (अपठित – अवबोधनम्)
खण्ड ख– 15 अंकाः (रचनात्मकम् खंडम्)
खण्ड ग– 25 अंकाः (व्याकरणिक–अवबोधनम्)
खण्ड घ– 30 अंकाः (साहित्यिक –खंडम्)

---

<u>खण्ड क</u>

<u>अपठित – अवबोधनम्</u>

1. अधोलिखितं अनुच्छेदं पठित्वा अधःदत्तान प्रष्नान् उत्तरत –

निदाधः खलु कष्टकरः कालः वर्तते। अस्मिन् काले व्योमे उच्चैः स्थितः भानुः प्रचण्ड–तापेन तपति। वसन्ततौं पष्चात् अस्य ग्रीष्मस्य आगमनं भवति। मानवाः पषवः –पक्षिनः सर्वे च जीवाः जन्तवः च व्याकुलाः भवन्ति। गृहात् बहिः गमनं कष्टकरं भवति। धूलिपूरिताः वाताः वान्ति। जलस्य न्यूनता भवति, सरोवराः जलाषयाः सरिताष्च षुष्यन्ते। पृथ्वी अपि अति तापेन तप्ता भवति। वृक्षाणाम् छाया अतीव सुखकरी प्रतीयते। प्रत्यक्षरूपेण कष्टकरः अयं कालः मानवानं हिताय अपि अस्ति। प्रस्वेदरूपेण तेषां षरीरेभ्यः सर्वान् दोषान् बहिः करोति। अयं निदाधः एव मेघानाम् उत्पत्तिकारकः। यैः मेघैः इयं पृथ्वी षस्यष्यामला क्रियते। एवं ग्रीष्मर्तुः अपि अस्माकम् उपकारं एव करोति।

**I.** एकपदेन उत्तरत :– **[½X4=2]**

(क) ग्रीष्मकालः कीदृषः कालः?
(ख) आकाषे कः प्रचण्डतापेन तपति?
(ग) ग्रीष्मर्तौ कस्य न्यूवता भवति?
(घ) निदाधः केषाम् उत्पत्तिकारकः?

**II.** पूर्णवाक्येन उत्तरत :– **[1x2=2]**

(क) मेघाः किं कुर्वन्ति?
(ख) ग्रीष्मस्य तापेन के व्याकुलाः भवन्ति?

**III.** माणिक कार्यम् **[1x4=4]**

(i) 'ग्रीष्मकालः' अस्य पदस्य कृते किं अन्यत् पर्याय पदं गद्यांषे प्रयुक्तम् अस्ति?
(ii) 'कूलपूरिताः वाताः' अनयोः विषेषनपदं किं अस्ति?
(iii) 'ग्रीष्मर्तुः अस्माकं उपकारं करोति' अत्र 'करोति' क्रियापद कर्तृपदं किं अस्ति?
(iv) तेषां षरीरेभ्यः ......................। अत्र 'तेषां' सर्वनामपदं कस्मै प्रयुक्तम्?

**IV.** गद्यांषस्य कृते उचितं षीर्षकं दीयताम्। **[2]**

## खण्ड ख
## रचनात्मकम् खंडम्

2. भवान् गोविन्दः । भवताम् विद्यालये सुभाषचंद्रबोसस्य जन्मदिवसे आयोजितं रक्तदानषिविर विषयकं वर्णनं कुर्वता स्वमित्रं राघवं प्रति लिखितपत्रे मंजूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं लिखत – [½X10=5]

प्रिय मित्र राघव!

**(i)** ............................

ह्यः एव तव पत्रं प्राप्तम्। महात्यागान्धिनः जन्मदिवस्य समारोहः भवताम् विद्यालये यथा संपादितम् इति **(ii)** ............ अतीव प्रसनः ।अहम् अपि स्वविद्यालयस्य एतादृषस्य समारोहस्य विषये लिखामि यस्मिन् महापुरूषाणाम् विचाराणाम् अनुसरनं कृत्वा एव तेभ्यः **(iii)** ............ दत्ता। जानासि त्वं जनवरीमासे **(iv)** .... ......... जन्मदिवसः भवति।

तस्य इदं उद्घोषणं 'यूयम्' मह्यम् रक्तं यच्छत अहम् युष्मभ्यम् **(v)** ............ प्रदास्ये 'इति आश्रित्य एव अस्माकम् विद्यालये **(vi)** ............ आयोजनं कृतम्। विद्यालयस्य क्रीडा–प्रमुखः अस्य षिविरस्य आयोजकः आसीत्। रक्तदानार्थं अहं प्रथमः प्रथमोऽहम् ' इति छात्राणाम् अध्यापकानां तथा च प्रषासकवर्गस्य **(vii)** ............ दर्षनीयः आसीत्। अस्य कार्यक्रमस्य साफल्यं एवं सुभाषमहोदयं प्रति उचिता श्रद्धांजलि। सैनिकचिकित्सालयस्य सर्वेऽपि **(viii)** ............ कार्यक्रमस्य अद्भुत् साफल्यं भूरि भूरि **(ix)** ............ ।

गृहे मातृपितृ चरणयोः मम प्रणामाः । षेष मिलनानन्तरं एव कथयिष्यामि ।

भवदीयम् अभिन्नं मित्रम्

**(x)** ............................

| मंजूषा – चिकित्सका : उत्साहः, गोविन्द, नमस्ते, प्रषंसितवन्तः, स्वाधीनतां, श्रद्धांजलिः, ज्ञात्वा, रक्तदान षिविरस्य, सुभाषचंद्रबोसस्य |
|---|

3. प्रदतं चित्रं दृष्ट्वा मंजूषायाः सहायतया संस्कृते पंचवाक्यानि लिखत – [2x5=10]

अथवा

’ साक्षरताया : लाभाः– इति विषये मंजूषायाः पदानां सहायतया संस्कृते पंचवाक्यानि रचयत–

मंजूषा

| |
|---|
| आदर्ष षिक्षा ग्रहणे, चरित्रषिक्षणे, ज्ञानपूर्णग्रन्थानां पठने, अक्षर ज्ञानम्, जनानां स्वहस्ताक्षरम्, आवेदनदपत्रम् नियुक्तिपत्रं पठितुं शक्यन्ते, सर्वकारसमर्थितं जन –आंदोलनम्, आजीविकायाः व्यस्था, निर्धनतायाः |

## खण्ड ग

## अनुप्रयुक्त व्याकरणम् [1x5=5]

4. संधिच्छेदं संधि वा कुरूत–

**(i)** मया षिवः+अर्च्यः अस्ति।

**(ii)** अत्र मत्सयजीवी आगच्छति, मीनम् +च विक्रीणाति।

**(iii)** कथमपि न एतच्छक्यम्।

**(iv)** सः तत पुनरूपविषति

**(iv)** सर्वत्र सदा + एक्यस्य वासः भवेत्।

5. पदानां समासं विग्रहं वा कुरूत **[1x5=5]**

**(i)** नृपभीताः मनुवयाः कष्टं सहन्ते।

**(ii)** कदापि न ऋतं मा वद।

**(iii)** पंचतंत्रे अनेकाः कथाः वर्तन्ते।

**(iv)** अस्मिन् संसारे सर्वज्ञः कोऽपि न अस्ति।

**(v)** कोकिलः आम्रवृक्षे स्थित्वा मधुरस्वरेण गायति।

6. प्रकृति प्रत्ययान् विभाज्य संयोज्य वा लिखत **[1x5=5]**

**(i)** गुणिनः जनाः सदैव वंदनीयाः

**(ii)** ....................... मनुष्याः सर्वेषाम् चित्तं हरन्ति। **( बुद्धि + मतुप्)**

**(iii)** सेतु निर्माणम् .......................कार्यम् वर्तते। **( समाज + ठक)**

**(iv)** वृक्षाणाम् ..................... के न जानन्ति? **( महत् + त्व)**

**(v)** कष्मीरदेषस्य सुन्दरतायाः दर्षनं सर्वे कर्तुम् इच्छन्ति।

7. वाच्यानुसारं कोष्ठकेषु प्रदत्तपदैः रिक्तस्थानानि पूरयत – **[½x6=3]**

लेखा – ष्यामे! किं त्वं अधुना पत्रं लिखसि?
ष्यामा– आम्! 1............ अधुना एकं पत्रं लिख्यते।
लेखा – किं त्वं मातरं प्रति लेखं 2.............?
ष्यामा– आम् मया मातरं प्रति लेखं 3..................?
लेखा– षोभनम्, अहम् अपि एकं पत्रं लिखामि।
ष्यामा – त्वं कं प्रति लेखं 4 .......................?
लेखा – मया पितरं प्रति 5 ............... लिख्यते।
ष्यामा – षोभनम् ! 6.................. उचितं करोषि।

8. उचित अव्यय पदैः रिक्तस्थानानि पूरयत– [1x4=4]

(i) सभामध्ये ..................... न वक्तव्यम् ।

(ii) ...........................वृष्टिः आरब्धा ।

(iii) ...........................तुष्णीम् स्थित्वा स्वाध्ययनं कुरू।

(iv) गहनविपिने हिंसकजीवाः रात्रौ ......................... गर्जन्ति।

(मंजूषा – उच्चैः, इदानीम्, वृथा, सहसा)

9. रिक्तस्थानेषु उचितं समयं लिखत [1x3=3]

(i) रेलयानम् राँचीनगरे ...........9:15................. वादने आगमिष्यति।

(ii) राँचीनगरात् रेलयानम् पटनागरं प्रति ...........12:45................. वादने गमिष्यति।

(iii) तस्मात् स्थानात् ...........4:30................. वादने गोमो इति स्थानं गमिष्यति।

## खण्ड घ

## पठित अवबोधनम्

10. अधोलिखितं गद्यांषं, पद्यांष, नाटयांषं च पठित्वा प्रष्नान् उत्तरत

अ गद्यांषं

अथ एकदा भगवान् बोधिसत्वः बहुजन्मार्जितपुण्यफलैः षिवीनां राजा बभूव। सः बालात् एव वृद्धोपसेवी, विनयषीलः षास्त्रपारङ्गतः च आसित्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारूण्य–औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन–धान्यसमृद्धाः दानषालाः अकारयत्। तत्र अर्थिनां समूहः अन्न –पान वसन –रजत–सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानषीलताम् आकर्ण्य देषान्तरेभ्योऽपि जनाः तं देषम् आयान्ति स्म।

I. एकपदेन उत्तरत :– [1x2=2]

(i) भगवान बोधिसत्वः केषां राजा बभूव?

(ii) राज्ञः किं श्रुत्वा जनाः तं देषं आयान्ति स्म?

II. एकवाक्येन उत्तरत :– [1x2=2]

प्रजा कल्याणार्थं राजा किं किं कार्यं अकरोत्?

III. एकवाक्येन उत्तरत :– [1x2=2]

(i) जनाः तं देषं आयान्ति स्म। अत्र कतृपदं किं अस्ति?

(ii) सः बाल्यात् एव विनयषीलः आसीत्। अत्र सः सर्वनामपदं कस्मै प्रयुक्तम् अस्ति?

(iii) 'याचकानाम्' इत्यर्थे गद्यांषे किं पदं प्रयुक्तं अस्ति?

(iv) ' अभीष्टानि वस्तुनि' अनयोः विषेष्य पदं किं अस्ति?

आ काव्यांष

अपूर्व कोऽपि कोषोऽयं विद्यते तव भारति
व्ययतः वृद्धिमायाति क्षयमाति सञ्चयात्।

I. एकपदेन उत्तरत :– [1x2=2]

(i) विद्या व्ययतः किं आप्नोति?

(ii) सरस्वत्याः कोषः कथं वर्धते?

**II.** एक वाक्येन उत्तरत :– **[1x2=2]**

भारत्याः कोषस्य नाषः कथं भवति?

**III.** यथानिर्देषं उत्तरत :– **[½x4=2]**

(i) 'अपूर्वः कोषः' पदयोः विषेषणं पदं किं अस्ति?

(ii) 'विद्यते ' क्रियापदस्य कतृपदं किं अस्ति?

(iii) 'संग्रहणात्' इत्यर्थे ष्लोके किं पदं प्रयुक्तं अस्ति?

(iv) 'तव' सर्वनामपदं कस्मै प्रयुक्तं अस्ति?

इ नाट्यांष

राजा– (षालिहोत्रज्ञान् आहूय अपृच्छत्) 'हा! दग्धाः मे घोटकाः कथं रक्षणीया?
सपदिं उपायं : क्रियताम्।

राजवैज्ञः– कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अष्वानां नाषमभ्येति तमः सूर्योदये यथा।।

**I.** एकपदेन उत्तरत :– **[1x2=2]**

(i) राजा कान् आहय अपृच्छत्?

(ii) अष्वानां बह्निदोषः केन षाम्यति?

**II.** एकवाक्येन उत्तरत– **[2x1=2]**

सूर्योदयेन किं भवति?

**III.** यथानिर्देषम् उत्तरत

(i) 'गुणः' इति पदस्य किं विपर्यय नाट्यांषे प्रयुक्तम्?

(ii) अष्वाः पदस्य किं पर्यायपदं अत्र प्रयुक्तं अस्ति?

(iii) दग्धाः मे घोटकाः अत्र 'मे' सर्वनामपदं कस्मै प्रयुक्तं अस्ति?

(iv) मर्कटानाम् एतस्य पर्यायपदं नाट्यांषात् चित्वा लिखत ।

**11.** रेखांकित पदानि आश्रित्य प्रष्ननिर्माणं कुरू। **[1x4=4]**

(i) विषयान् ध्यायतः <u>पुंसः</u> संगस्तेषूपजायते।

(ii) त्यागी <u>सर्वव्यसनविनाषे</u> दक्षः।

(iii) <u>षक्रः</u> अहम् अस्मि देवन्द्रः।

(iv) मित्ररूपाः हि <u>रिपवः</u> सम्भाष्यन्ते विचक्षणैः ।

**12.** ष्लोकयोः अन्वयं उचितपदैः पूरयत– **[½x8=4]**

**(i)** दास्यामीति प्रतिज्ञाय योऽन्यथा कुरूते मनः
कापर्ण्यानिष्चितमतेः कः स्यात् पापतरस्ततः

अन्वय– दास्यामि 1....... प्रतिज्ञाय 2........... मनः अन्यथा कुरूते,
कापर्ण्य 3............... ततः 4................ कः स्यात्।

**(ii)** तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतवर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञान नाषनम्।।

अन्वय– भरतवर्षभ! 1....... त्वम् 2........ इन्द्रियाणि नियम्य 3.........एनम् पाप्मानं 4.......... प्रजहि।

**13.** रेखांकित पदानां प्रसंगनुसारं षुद्धं अर्थं लिखत **[1x4=4]**

(क) हेयम् अपि च किम्? <u>अकार्यम्</u>।

**(i)** कार्यं प्रति विमुखता **(ii)** अकरणीयं कृत्यं **(iii)** यः कार्यं न करोति। **(iv** करणीयं कृत्यं

(ख) कलहन्तानि <u>हर्म्याणि</u> कुवाक्यान्तं च सौहृदम्

**(i)** फलानि **(ii)** मित्राणि **(iii)** पर्वाणि **(iv)** प्रासादाः

(ग) किं च <u>अनर्घम्</u> ? यदवसरे दत्तम्।

**(i)** पापरहितम् **(ii)** हेयम् **(iii)** बहुमूल्यम् **(iv)** अर्थरहितम्

(घ) <u>अभीष्टानि</u> वस्तूनि प्राप्य संतुष्टः अभवत्

**(i)** वाञ्छितानि **(ii)** अमूल्यानि **(iii)** दृष्टानि **(iv)** प्राप्तानि